## पृथ्वादिभ्य इमनिज्वा । (१२२/१७८४)

पृथु इत्येवमादिभ्यः प्रातिपदिकेभ्यः इमनिच् प्रत्ययो भवति वा तस्य भावः इत्येतस्मि[1]न्नर्थे । वावचन-म[2]णादेः समावेशार्थम् । पृथोर्भावः प्रथिमा, पार्थवम् । म्रदिमा, मार्दवम् । '[3]तुरिष्ठेमेयःसु' (६.४.१५४/२००८), 'टेः' (६. ४. १५५/१७८६) इति टिलोपः । 'र ऋतो हलादेर्लघोः' (६.४.१६१/१७८५) इति रेफादेशः । त्वतलौ सर्वत्र भवत एव । पृथुत्वम्, पृथुता । मृदुत्वम्, मृदुता ।

पृथु । मृदु । महत् । पटु । तनु । लघु । बहु । साधु । वेणु[4] । आशु । बहुल । गुरु[5] । दण्ड । ऊरु । [6]खण्ड । चण्ड । बाल । अकिंचन । [7]होड । पाक । [8]वत्स । मन्द । स्वादु । ह्रस्व । दीर्घ । प्रिय । वृष । ऋजु । क्षिप्र । क्षुप्र । क्षुद्र । पृथ्वादिः ॥

## वर्णदृढादिभ्यः ष्यञ् च । (१२३/१७८७)

वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति, चकारात् इमनिच् च, तस्य भावः इत्येतस्मिन् [9]विषये । शुक्लस्य भावः शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता । कार्ष्ण्यम्, कृष्णिमा, कृष्णत्वम्, कृष्णता । दृढादिभ्यः[10] – दार्ढ्यम्, द्रढिमा, दृढत्वम्, दृढता । षकारो ङीषर्थः । औचिती । [11]याथाकामी ।

[12]दृढ । परिवृढ । भृश । कृश । [13]चक्र । [14]आम्र । लवण । ताम्र । अम्ल । शीत । उष्ण । जड । बधिर । पण्डित । मधुर । मूर्ख । मूक[15] । 'वेर्यातलाभमतिमनः शारदानाम्' (ग.सू.१११) । 'समो मतिमनसोः'[16] (ग. सू. ११२) ॥

## गुणवचनब्राह्मणादिभ्यः कर्मणि च । (१२४/१७८८)

गुणमुक्तवन्तो गुणवचनाः । गुणवचनेभ्यो [17]ब्राह्मणादिभ्यश्च तस्य इति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ् प्रत्ययो भवति । चकाराद् भावे च । कर्मशब्दः क्रियावचनः । जडस्य भावः कर्म वा जाड्यम्[18] । ब्राह्मणादिभ्यः खल्वपि – ब्राह्मण्यम् । माणव्यम् ।

आपादपरिसमाप्ते[19]र्भावकर्माधिकारः । ब्राह्मणादिराकृतिगणः । आदिशब्दः प्रकारवचनः ।

[५३९] चातुर्वर्ण्यादिभ्यः स्वार्थे उपसङ्ख्यानम् । (म.भा.२. ३७०)

चत्वार एव वर्णाः चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैलोक्यम् । त्रैस्वर्यम् । षाड्गुण्यम् । सैन्यम् । सान्निध्यम् । सामीप्यम् । [20]औपम्यम् । सौख्यम् ।

ब्राह्मण । बाडव । माणव । चोर । मूक । [21]आराधय । विराधय । अपराधय । उपराधय । एकभाव । द्विभाव । त्रिभाव । अन्यभाव । समस्थ । विषमस्थ । परमस्थ । [22]मध्यमस्थ । अनीश्वर । कुशल । [23]कपि । चपल । अक्षेत्रज्ञ । निपुण । 'अर्हतो नुम् च' (ग. सू. ११३) आर्हन्त्यम् । संवादिन् । संवेशिन् । बहुभाषिन् । बालिश । दुष्पुरुष । कापुरुष । दायाद । विशसि । धूर्त । राजन् । संभाषिन् । शीर्षपातिन् । अधिपति । अलस । पिशाच । पिशुन । विशाल । गणपति । धनपति । नरपति । गडुल । निव । निधान । विष । 'सर्ववेदादिभ्यः स्वार्थे' (ग. सू. ११४) । 'चतुर्वेदस्योभयपदवृद्धिश्च' (ग. सू. ११५) । चातुर्वैद्यम् । इति ब्राह्मणादिः ॥

---

1. विषये ग. फ. 2. अणादिसमावेशार्थम् कः 3. तुरिष्ठे – रेफादेशः नास्ति क. 4. अणु इत्यधिकम् क.
5. अञ्चु विणु इत्यधिकम् ड. 6. खण्ड नास्ति ड. 7. चारु वक्र तृप होठ इत्यधिकम् ड. ब, महरज भोग इत्यधि-
कम् ह. 8. आररु इत्यधिकम् क. 9. अर्थे क. फ. 10. खल्वपि इत्यधिकम् ब. क. फ. ह. 11. यथाकामा
आनुपूर्वा क. 12. वृढ इत्यधिकम् ड. फ. ह. 13. वक्र इत्यधिकम् फ, चुक्र ड. 14. अम्र ड. 15. आर्द्र
मुखर इत्यधिकम् क. 16. जवने इत्यधिकम् ड. फ. ह. 17. शब्देभ्यः इत्यधिकम् क. फ. 18. मौढ्यम्
इत्यधिकम् क. ड. फ, मौर्ख्यम् इत्यधिकम् फ. 19. भावकर्मणोः क. 20. आयस्यम् ड. 21. आराधय नास्ति ड.
22. उपरमस्य ड. 23. कवि ड.